# शान्ति सूक्तम्

आ नो भद्राः क्रत॑वो यन्तु विश्वतोऽद॑ब्धासो अप॑रीतास उद्भिद॑ः।

देवा नो यथा सदमिद् वृधे असन्नप्रा॑युवो रक्षितारो दिवेदि॑वे।।१।।

देवानां॑ भद्रा सु॑मतिर्ऋजूयतां देवानां॑ रातिरभि नो नि व॑र्तताम्।

देवानां॑ सख्यमुप॑ सेदिमा वयं देवा न आयुः प्र ति॑रन्तु जीवसे।।२।।

तान्पूर्वया निविदा॑ हूमहे वयं भग मित्रमदि॑तिं दक्ष॑मस्त्रिध॑म्।

अर्यमणं वरु॑णं सोम॑मश्विना सर॑स्वती नः सुभगा मय॑स्करत्।।३।।

तन्नो वातो मयोभू वा॑तु भेषजं तन्माता पृ॑थिवी तात्पिता द्यौः।

तद् ग्रावा॑णः सोमसुतो मयोभुवस्तद॑श्विना शृणुतं धिष्ण्या युवम्।।४।।

तमीशा॑नं जग॑तस्तस्थुषस्पति॑ धियंजिन्वमव॑से हूमहे वयम्।

पूषा नो यथा वेद॑सामस॑द् वृधे र॑क्षिता पायुरद॑ब्धः स्वस्तये।।५।।

स्वस्ति न इन्द्रो वृद्धश्र॑वाः स्वस्ति न॑ः पूषा विश्ववेदाः।

स्वस्ति नस्तार्क्ष्यो अरि॑ष्टनेमिः स्वस्ति नो बृहस्पति॑र्दधातु।।६।।

पृष॑दश्वा मरुतः पृश्नि॑मातरः शुभंयावा॑नो विदथेषु जरमय॑ः।

अग्निजिह्वा मन॑वः सूर॑चक्षसो विश्वे नो देवा अवसा ग॑मन्निह।।७।।

भद्रं कर्णे॑भिः शृणुयाम देवा भद्रं प॑श्येमाक्षभि॑र्यजत्राः।

स्थिरैरङ्गै॑ स्तुष्टुवांस॑स्तनूभिर्व्यशेम देवहि॑तं यदायु॑ः।।८।।

शतमिन्नु शरदो अन्ति॑ देवा यत्रा॑ नश्चक्रा जरस॑ं तनूना॑म्।

पुत्रासो यत्र॑ पितरो भव॑न्ति मा नो मध्या रीरिषतायुर्गन्तो॑ः।।९।।

- ऋग्वेद.१.८९.९.

द्यौः शान्तिरन्तरिक्षं शान्ति॑ः पृथिवी शान्तिरापः

शान्तिरोषधयः शान्तिः।

वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः

सर्व शान्तिः शान्तिरेवशान्तिः सा मा शान्तिरेधि।।

- शुक्लयजुर्वेद ३६.१७

एवा ह्येव एवा ह्यग्ने एवा हीन्द्रः।

एवा हि पूषन् एवा हि देवाः।।

- सामवेद, १0

पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते।

पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।